दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-4 ■ अङ्क-3

1

02.10.2024 शुक्रवासरः वि.सं. २०८१ कार्तिकशुक्लप्रतिपदा कार्तिक 17 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## नवम्बरमासस्य पञ्चमे दिनाङ्के भविष्यति अमेरिकादेशस्य राष्ट्रपतिनिर्वाचनम्



हिमसंस्कृतवार्ताः 02 नवम्बर। अमेरिकादेशे नवम्बरमासस्य पञ्चमे दिनाङ्के संजायमाणे राष्ट्रपतिनिर्वाचनस्य कृते डेमोक्रेटिकपार्टीति दलस्य कमला हैरिस्, रिपब्लिकनपक्षस्य डोनाल्ड ट्रम्पः च प्रचारस्य अन्तिमसप्ताहे महत्त्वपूर्णप्रान्तानां भ्रमणं आरब्धवन्तः। निर्वाचनात् प्राक् सर्वेक्षणानानुसारं प्रतिद्वन्द्वीनां मध्ये निकटस्पर्धा वर्तते। विभिन्नेषु सर्वेक्षणेषु कमला हैरिस् ट्रम्पस्य अपेक्षया किञ्चित् अग्रतां संधत्ते। वर्तमानराष्ट्रपतिः जो बाइडेन् इत्यस्य पुनः निर्वाचनेन अस्वीकार्यतामालक्ष्य कमला हैरिस् डेमोक्रेटिकपक्षस्य प्रत्याशिनी सञ्जाता। एतस्याः कृते षड्कोटिभ्यः अधिकाः अमेरिकीयजनाः मतदानं कृतवन्तः। मतदातारः राष्ट्रपतिनिर्वाचनाय ई-मेलद्वारा अथवा व्यक्तिगतरूपेण मतदानं कृतवन्तः।

## अमितशाहः अहमदाबादस्य पिराना नगरे गुजरातस्य बृहत्तमस्य अपशिष्टस्य ऊर्जायाः संयंत्रस्य उद्घाटनं विहितवान्



हिमसंस्कृतवार्ताः 02 नवम्बर। केन्द्रीयगृहमन्त्री अमितशाहः गतदिने अहमदाबादस्य पिराना नगरे गुजरातस्य वृहत्तमस्य अपशिष्टस्य ऊर्जायाः संयंत्रस्य उद्घाटनं विहितवान् । सार्वजनिक सहयोगेन निर्मितस्य अस्य संयंत्रस्य पञ्चसप्तत्यधिकत्रिंशत्कोटिरूप्यकाणां व्ययः अभवत्। एषः गुजरातस्य प्रथमः अवकरः ऊर्जासंयंत्रः भविष्यति। अस्मिन् अवसरे गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः अपि उपस्थितः आसीत् । अहमदाबादस्य पिराना-नगरे स्थापितं राज्यस्य बृहत्तमः अपशिष्ट-ऊर्जा-संयंत्रः अहमदाबाद-नगरपालिकायाः जिन्दल-समूहस्य चोभयोः संयुक्त तत्वावधाने विनिर्मितः अस्ति। प्रायोगिकरूपेण आरब्धस्य अस्य संयंत्रस्य अद्य आधिकारिकतया उद्घाटनं जातम्। अस्मिन् संयंत्रे प्रतिदिनं प्रायः एकसहस्रमेट्रिकटनमितं अपशिष्टं संसाधितं भविष्यति, येन पञ्चदश मेगावाट्मतस्य ऊर्जा उत्पद्यते। अयं संयंत्रः न केवलं हरितं स्वच्छं च भविष्यं सुनिश्चितं करिष्यति, अपितु प्रभावि अपशिष्टप्रबन्धनस्य आदर्शः उपक्रमः अपि सिद्धः भविष्यति।

## गीतोपदेशः

**उत्सन्नकुलधर्माणां**
**मनुष्याणां जनार्दन |**
**नरके नियतं वासो**
**भवतीत्यनुश्रुश्रुम || ४३ ||**

**शब्दार्थ-** उत्सन्न – विनष्ट; कुल-धर्माणाम् – पारिवारिक परम्परा वाले; मनुष्याणाम् – मनुष्यों का; जनार्दन – हे कृष्ण; नरके – नरक में; नियतम् – सदैव; वासः – निवास; भवति – होता है; इति – इस प्रकार; अनुशुश्रुम – गुरु-परम्परा से मैनें सुना है

### भावार्थ

हे प्रजापालक कृष्ण! मैनें गुरु-परम्परा से सुना है कि जो लोग कुल-धर्म का विनाश करते हैं, वे सदैव नरक में वास करते हैं।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## विधानसभानिर्वाचनस्य द्वितीयचरणस्य नामाङ्कनानां प्रत्याहरणप्रक्रिया झारखण्डे प्रचलति

हिमसंस्कृतवार्ताः 02 नवम्बर। विधानसभानिर्वाचनस्य द्वितीयचरणस्य नामाङ्कनानां प्रत्याहरणप्रक्रिया झारखण्डे प्रचलति। अवधेयास्पदं वर्तते यत् प्रत्याहरणस्य गतदिने अन्तिमातिथिः आसीत्। चतुस्त्रिंशत्तोत्तर षट्शत अभ्यर्थिनः नामाङ्कनं विहितवन्तः। नामाङ्कनां प्रत्याहरणप्रक्रियानन्तरं अभ्यर्थीनां अन्तिमाङ्काः आयास्यन्ति इति अपेक्षा क्रियते। द्वितीयचरणस्य अष्टत्रिंशनिर्वाचनक्षेत्रेषु मतदानं नवम्बरमासस्य विंशतिदिनाङ्के भविष्यति।

## राष्ट्रपतिः प्रधानमन्त्री च आन्ध्रप्रदेश, छत्तीसगढ़ इत्यादिनां राज्यानां राजत्वदिवसे शुभकामनाः अयच्छताम्

हिमसंस्कृतवार्ताः 02 नवम्बर। राष्ट्रपति द्रौपदी मुर्मुः, उपराष्ट्रपतिजगदीपधनखड़ः, प्रधानमन्त्री नरेन्द्र मोदी च गतदिने आन्ध्रप्रदेश, छत्तीसगढ़, हरियाणा, कर्नाटक, केरल, मध्यप्रदेश, पंजाब, तमिलनाडु, लक्षद्वीप, पुडुचेरी प्रभिनां राज्यानां जनेभ्यः राज्यत्व-दिने अभिनन्दनं कृतवन्तः। एकस्मिन् सामाजिकान्तर्जालीय पटलमाध्यमेन राष्ट्रपतिः देशस्य विकासयात्रायां एतेषां राज्यानां केन्द्रशासितप्रदेशानां च जनानां योगदानं प्रकाशितवती। उपराष्ट्रपतिः जगदीप धनखड़ः कामनाम् अकरोत् यत् एतानि राज्यानि केन्द्रशासितप्रदेशाः च अविरतं प्रफुल्लिताः प्रगतिशीलाः च भवेयुः सममेव देशस्य शान्तिसमृद्धौ च योगदानं दद्युः। अत्रान्तरे एव एकस्मिन् सामाजिक अन्तर्जालीय पटले प्रधानमन्त्री मोदी अपि राज्यानां जनेभ्यः सफलतायै मङ्गलकामनाः अयच्छत्।

## युवकेभ्यः राष्ट्रीय-युवपुरस्कारस्य कृते आवेदनं कर्तुं आह्वानं विहितवान् केंद्रीययुव-क्रीडामंत्रीमनसुखमांडविया



हिमसंस्कृतवार्ताः 02 नवम्बर। केंद्रीययुवक्रीडामंत्रीमनसुखमांडविया युवभ्यः त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य प्रतिष्ठितस्य राष्ट्रीययुवपुरस्कारस्य कृते आवेदनं कर्तुं आह्वानं विहितवान्। पुरस्कारोयं पञ्चदशतः ऊनविंशतिः वर्ष पर्यंतं युवभ्यः संस्थानां विकासाय सामाजिकसेवानां विभिन्नक्षेत्रेषु उत्कृष्ट योगदानाय च प्रदास्यन्ते। एतासु सेवासु स्वास्थ्यं मानवाधिकाराणां प्रचारः सक्रियनागरिकता, सामुदायिकसेवाः च सम्मिलिताः सन्ति। अस्मिन् पुरस्कारे एक जनः एकं पदकं, प्रमाण पत्रं समेत्य एकलक्षरूप्यकाणां धनराशिं प्राप्स्यति। सममेव संगठनं त्रिलक्षरूप्यकाणां धनराशि प्रदास्यते। राष्ट्रीय-युवापुरस्काराय आवेदनं नवम्बरमासस्य प्रथमदिनांकतः पञ्चदशदिवसं यावत् गृह मंत्रालयस्य कॉमन अवार्ड पोर्टल इत्यनेन माध्यमेन आमंत्रिताः सन्ति।

## रेलविभागस्य चिटिकायाः आरक्षणस्य नूतनाः नियमाः प्रवर्तिताः

रेल विभागस्य चिटिकायाः आरक्षणस्य नूतनाः नियमाः 01 नवम्बर दिनांकात् प्रवर्तिता। विभागेन पूर्वारक्षणस्य समयसीमा विंशत्योत्तर एकशतदिवसात् षष्टीदिनं यावत् न्यूनीकृता। किन्तु वर्षस्यास्य एकअक्टूबर पर्यन्तं निर्मिताः सर्वाः आरक्षिताः चिटिकाः अक्षुण्णाः एव भविष्यन्ति। रेलमन्त्रालयानुसारं अनेन नियमेन यात्रिणः सौविध्यं अनुभविष्यन्ति।

## पूर्व लद्दाख क्षेत्रे भारतीयचीनसैन्यबलाः एल ए सी इति वास्तविकनियन्त्रणरेखायाः रक्षां कर्तुं सिद्धाः



हिमसंस्कृतवार्ताः 02 नवम्बर। पूर्व लद्दाख क्षेत्रे भारतीय चीन सैन्यबलाः एल ए सी इति वास्तविकनियन्त्रणरेखायाः रक्षां कर्तुं सिद्धाः। भारतीय सैन्य-बलानुसारं विंशत्युत्तर विंशतिः सहस्रतमवर्षस्य अप्रैलमासे द्वयोः सैन्यबलयोः संघर्षस्यान्तरं प्रायः सार्धचतुर्वर्षेभ्यः स्थगितस्य डेमचोक् क्षेत्रे रक्षा पुनः आरब्धा। देपसाङ्गे च शीघ्रमेव आरप्स्यते। गतमासे कूटनीतिकसैन्यस्तरस्य वार्तालापस्य श्रृङ्खलायाः अनन्तरं राष्ट्रद्वयं विसङ्गतिं कर्तुं सहमतौ। गतदिने दीपावली पर्वणि भारतीयचीन-सैन्यबलैः चुशुल् मोल्डो, दौलत बेग ओल्डी, हॉटस्प्रिंग, के. के. पास, कोंगक्ला इत्यादिषु विभिन्नेषु स्थानेषु मिष्ठानस्य आनादप्रदानं आचरितम्।

## हिमाचलप्रदेशे खाद्यान्नपत्रधारकेभ्यः दीपावल्याः अनन्तरमेव उचितमूल्यापणेषु शर्करायाः अतिरिक्तमात्रा



हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः। हिमाचलप्रदेशे खाद्यान्नपत्रधारकेभ्यः दीपावल्याः अनन्तरमेव उचितमूल्यापणेषु शर्करायाः अतिरिक्तमात्रा लभते। सर्वकारेण दीपावल्याः निमित्तं प्रति खाद्यान्नपत्रम् 500 ग्रामपरिमित्तं अतिरिक्ता शर्करा प्रतिजनं 100 ग्राम शर्कराप्रदानस्य निर्णयः कृतः। खाद्यनागरिकापूर्तिः एवं उपभोक्तृविषयकविभागेन खाद्यान्नपत्र-उपभोक्तृणां उत्सव विशेषकं (फेस्टिवल कोटा) प्रदानस्य अनुमोदनं सर्वकारं प्रति प्रेषितम् अस्ति। एक-द्वयोः दिवसयोः अन्ते अनुमोदनं लभ्यते। आगामिमासे उपभोक्तृभ्यः खाद्यान्नेन सह अतिरिक्तशर्करा अपि प्रदास्यते।
उल्लेखनीयं यत् प्रदेशे सार्ध 19 लक्ष खाद्यान्नपत्रधारकपरिवाराः सन्ति। सर्वकारस्य कृते उपभोक्तृभ्यः त्रयः दालः (मलका, माषः, दालचणः), द्वे तैलम्, लवणं, 500 ग्राम शर्करा: च प्रदीयते। गोधूमचूर्णं, तण्डुलान् च केन्द्रेणसर्वकारेण प्रदत्तं भवति। प्रदेशसर्वकारः मन्यते यत् अस्मिन्मासे शर्करायाः मात्रा वर्धिता अस्ति। खाद्य- नागरिक तथा उपभोक्तविषयकविभागस्य निदेशकः रामकुमारगौतमः उक्तवान् यत् उपभोक्तृभ्यः प्रति राशनकार्डं 500 ग्राम अतिरिक्तशर्करा प्रतिजनं 100 ग्राम प्रदेयम् अस्ति। सर्वकारतः अनुमोदनं प्रतीक्ष्यते।

## HP NEWS: देशस्य एकतायै बलिदानं दत्तवती इन्दिरागान्धी, रियासतानां एकीकरणे सरदारपटेलस्य महत्त्वपूर्णा भूमिका- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् पूर्वप्रधानमन्त्री इन्दिरा गान्धी देशस्य एकतायै अखण्डतायै च स्वप्राणान् बलिदानं कृतवती। सः अवदत् यत् इन्दिरा गान्धी देशभक्तिभावेन पूरिता आसीत् तथा च सा आतङ्कवादविरुद्धं स्वरं उत्थापयन्ती देशस्य प्रथमा प्रधानमन्त्री अभवत्, एतस्य आह्वानस्य च दृढतया सम्मुखीकरणं कृतवती। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः ऐतिहासिके रिजस्थले आयोजिते राष्ट्रियसंकल्पदिवसकार्यक्रमे भागं गृहीत्वा पूर्वप्रधानमन्त्री इन्दिरागान्धीवर्यायाः प्रतिमायां पुष्पश्रद्धांजलिम् अर्पयित्वा स्मरणं कृतवान्। अस्मिन् अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् इन्दिरा गांधी आतङ्कवादस्य विरुद्धं स्वरं उत्थापितवती तस्य सम्मुखीकरणम् अपि कृतवती। तस्याः मुखात् अन्तिमानि वचनानि जयहिन्दम् इति आसन्। मुख्यमन्त्री सरदारवल्लभभाई पटेलस्य जन्मदिवसस्य अपि स्मरणं कृतवान्। सः अवदत् यत् सरदार पटेलस्य कृतयः स्मर्तव्याः। सरदारपटेलः लौहपुरुषः इति नाम्ना प्रसिद्धः अस्ति, तस्य निर्णयाः कार्यान्विताः अभवन्। सः अवदत् यत् यदा भारतस्य लघु-बृहत् रियासतानां एकीकरणस्य विषयः आगतः तदा सरदारपटेलः तस्मिन् महती भूमिकां निर्वहति स्म।



अस्मिन् काले मुख्यमन्त्री राष्ट्रियप्रतिज्ञादिने सर्वेभ्यः शपथग्रहणमपि अकारयत्। पूर्वप्रधानमन्त्री इन्दिरागान्धी इत्यस्याः पुण्यतिथौ राष्ट्रियसंकल्पदिवसः आचर्यते। अस्मिन्नवसरे कांग्रेसस्य प्रदेशाध्यक्षा एवं पूर्वसांसद प्रतिभा सिंह, विधायकः शिमलानगरम् हरीश जनार्था, महापौरः नगरनिगमः शिमला सुरेन्द्रचौहानः उपमहापौरः उमा कौशल, मुख्यमंत्रिणः प्रधानमीडियापरामर्शकः नरेश चौहानः, पार्षदाः, कांग्रेसदलस्य कार्यकर्तारः, उपायुक्तः शिमला अनुपमकश्यपः, पुलिसाधीक्षकः संजीवकुमारगांधी आदय गणमान्यजनाः अपि इन्दिरागांधिवर्यायै श्रद्धांजलिम् अर्पितवन्तः।

## HP NEWS: कृषकाणां कृते धान्यस्य कृते ३२.३७ कोटिरूप्यकाणां भुक्तिः

हिमसंस्कृतवार्ताः - शिमला। राज्ये स्थापितेषु धानक्रयणकेन्द्रेषु १० अक्तूबरतः १ नवम्बरपर्यन्तं कृषकेभ्यः १५८६५.२२ मेट्रिकटनं धानसस्यं क्रीतम् अस्ति। राज्ये खाद्यापूर्तिविभागेन स्थापितेषु केन्द्रेषु धान्यस्य, रागीसस्यानां च क्रयणं क्रियते। एतावतः धानसस्यस्य कृते राज्यस्य कृषकाणां कृते ३२.३७ कोटिरूप्यकाणां भुक्तिः कृता। धान्यस्य, रागीसस्यानां च क्रयणार्थं आरक्षणपटलम् उद्घाटितम् अस्ति। राज्ये कृषकेभ्यः धान्यक्रयणार्थं खाद्यापूर्तिविभागेन राज्ये १९ धानक्रयणकेन्द्राणि स्थापितानि सन्ति। कृषकाः स्वस्य धान्यसस्यस्य विक्रयार्थं अन्तर्जालद्वारा पञ्जीकरणं कुर्वन्ति।



खाद्यापूर्तिविभागस्य पटले द्रुतगत्या आरक्षणं क्रियन्ते। राज्ये स्थापितेषु धान्यक्रयणकेन्द्रेषु स्वसस्यानां विक्रयणार्थं खाद्यापूर्तिविभागस्य पटले ७१८९ कृषकाः आनलाईनरूपेण पञ्जीकरणं कृतवन्तः। ७१८९ पञ्जीकरणानां मध्ये ७११२ पञ्जीकरणानां सत्यापनम् अभवत्। एतदतिरिक्तं ६९१५ कृषकाणां कृते टोकनं निर्गतम् अस्ति। विभागेन धान्यक्रयणार्थं कृषकाणां पञ्जीकरणार्थं HPAPP.NIC.in पटलमु इत्यस्य संकेतः सज्जीकृतः अस्ति। धान्यक्रयणसम्बद्धा सूचना विभागस्य अस्मिन् पटले उपलभ्यते। खाद्य-आपूर्तिविभागेन कृषकाणां कृते धान्यसस्यस्य क्रयणस्य सज्जता आरब्धा। राज्यस्य धान्यक्रयणकेन्द्रेषु ३१ दिसम्बरपर्यन्तं धान्यस्य क्रयणं भविष्यति

## HPP: पुलिसारक्षकनियुक्त्यर्थम् आयोगेन अन्तर्जालेन- आवेदनस्य तिथिः विस्तारिता, अभ्यर्थिभ्यः आश्रयः




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे १०८८ विशेषपुलिसारक्षकाणाम् नियुक्त्यर्थं ऑनलाइन-आवेदनस्य तिथिः १२ नवम्बरपर्यन्तं विस्तारिता अस्ति। राज्य- लोकसेवा- आयोगस्य जालपुटस्य स्थगितत्वात् अनेके युनः ३१ अक्तूबरमासस्य अन्तिमतिथिपर्यन्तम् आवेदनं कर्तुं न शक्तवन्तः। वार्तापत्रेषु पुलिसारक्षकनियुक्तिः जालपुटं स्थगितम् इति शीर्षकेण वार्ता: अपि प्रकाशितं कृत्वा एषः विषयः उत्थापितः आसीत्, अद्य आवेदनस्य अन्तिमः दिवसः अस्ति। एतत् अवगत्य आयोगेन शुक्रवासरे स्वस्य सत्रे ऑनलाइन-आवेदनस्य तिथिं विस्तारयितुं निर्णयः कृतः।

## AIIMS BILAT: एम्सतः धर्ममपुरप्रयोगशालां यावत् रक्तस्य प्रतिरूपाणि प्रापयिस्यति ड्रोनयन्त्रम्



### बिलासपुरे रोगिणः उत्तमसुविधाः प्राप्स्यन्ति, वृक्कप्रत्यारोपणं प्रारब्धम्

हिमसंस्कृतवार्ताः - बिलासपुरम्। अखिलभारतीये आयुर्विज्ञानसंस्थाने बिलासपुरे वृक्कप्रत्यारोपण सेवा प्रारब्धा। वृक्कप्रत्यारोपणार्थं ICU 2 कोटिरूप्यकाणां व्ययेन निर्मितः, वृक्कप्रत्यारोपण- गभीरचिकित्साएककम् (Renal Transplant ICU) इत्यस्य निर्माणेन किडनीचिकित्सायां प्रमुखं अन्तरं पूरयिष्यति। वृक्कप्रत्यारोपणचिकित्सासुविधानां उपलब्ध्या रोगिणां चिकित्सायै राज्यात् बहिः गन्तुं आवश्यकता न भविष्यति। रक्तस्य प्रतिरूपाणि ड्रोन-माध्यमेन धर्मपुर-प्रयोगशालायां नेष्यन्ते, प्रतिरूपाणि एकहोरायां प्रयोगशालां प्राप्स्यन्ति, यदा तु पूर्वं वाहनद्वारा चतुर्पञ्चहोराः यावत् समयः भवति स्म तथैव यत्र यत्र काऽपि दुर्घटना भवति तत्र तत्क्षणमेव दलं तत्स्थानं प्राप्य रक्तस्य प्रतिरूपाणि तत्क्षणमेव ड्रोन- माध्यमेन एम्स इत्यत्र प्रेषिताः भविष्यन्ति। मंगलवासरे देशस्य प्रधानमन्त्री २३२ कोटिरूप्यकाणां अनुमानितव्ययेन प्रायः एताः सेवाः प्रारब्धवान्। अनेकाः आधारशिलाः अपि स्थापिताः सन्ति। एतेन शिलान्यास- उद्घाटन- कार्यक्रमेण हिमाचलसदृशानां कठिन-भौगोलिक- प्रदेशानां रोगिणः आधुनिक- चिकित्सासेवानां लाभं प्राप्तुं आरभन्ते। अखिलभारतीये आयुर्विज्ञानसंस्थाने ब्रोंकोस्कोपी- सुइट- निर्माणं भविष्यति यस्य मूल्यं ६० लक्षरूप्यकाणि भविष्यति। एषा सुविधा फुफ्फुसस्य कर्करोगः, कवकसंक्रमणं, क्षयरोगं च इत्यादीनां श्वसनरोगाणां चिकित्सां करिष्यति। क्रिटिकल् केयर ब्लॉक् तथा आपत्कालीन आघातः एतत् बहुमहलीयं संरचना एम्स इत्यत्र ३५० कोटिरूप्यकाणां अनुमानितव्ययेन निर्मितं भवति। अस्मिन् आधुनिकाः आघातसुविधाः, हेलीपैड च भविष्यति, येन आघातप्रकरणानाम्, चिकित्सासंकटानां च शीघ्रं कुशलं च प्रतिक्रियाः प्राप्यन्ते।

### एम्स इत्यत्र विश्रामगृहं निर्मितं भविष्यति

अखिलभारतीये आयुर्विज्ञानसंस्थाने विश्रामगृहं निर्मितं भविष्यति, यस्य व्ययः २६.७५ कोटिरूप्यकाणि भविष्यति। इयं परियोजना पावर ग्रिड् सीएसआर इत्यस्य प्रयासः अस्ति, यत् रोगी परिवारेभ्यः आवासं प्रदास्यति। एतेन सह एम्स-भवनानां छदौ सौर-पटलानि स्थापितानि सन्ति, येषु ४ कोटिरूप्यकाणि व्ययः भविष्यन्ति। स्थायि ऊर्जाप्रथानां प्रवर्धनार्थं सौरपटलानां स्थापना आरब्धा।

# दीपावल्याः अवसरे हिमाचल-पथ-परिवहन निगमाय प्रतिदिनम् अर्धत्रिकोटिः रूप्यकाणाम् आयः




हिमसंस्कृतवार्ता:- डॉ. पद्मनाभः। दीपावल्यां विशेषयानेन हि. प. प. निगमः धनसंचयं पूरितवान्। हिमाचल पथ परिवहन निगमेन दीपावल्याम् उत्तमः व्यवसायः कृतः। एतत् निगमस्य वित्तीयस्थितौ सहायकं भविष्यति। वर्षे अयं समयः एव अस्ति यदा निगमः उत्तमं लाभं प्राप्नोति, परन्तु अनुमान्यते यत् अस्मिन् वर्षे निगमस्य लाभः पूर्वेभ्यः अधिकः अभवत्। कारणं तु तेन केवलं स्वसेवाम् एतस्मिन् समये वर्धितमस्ति न अपि तु विशेषयानेन जनानां सुविधायाः अपि प्रबन्धं कृतः। सूचनानुसारं गतसप्ताहे प्रतिदिनं हि. प. प. निगम अर्धत्रिकोटि रूप्यकाणाम् आयः प्राप्नोति। एकस्मिन्नेव दिने बुधवासरे च निगमस्य आयः २ कोटि ७० लक्ष रूप्यकाणां पर्यन्तं प्राप्तमस्ति, यतः निगमेन चण्डीगढं दिल्लीं च प्रदेशातः बहिः १५५ विशेषयानानि प्रेषितानि। निगमस्य व्यवसायः एवमेव अनुवर्तते चेत्, तदा आगामिनि एकस्मिन् द्वयोः वा मासयोः तस्मै श्रान्तिः भविष्यति। यद्यपि अयम् अपि वित्तीयसंकटात् न निर्गतुं शक्नोति, तथापि किञ्चित् राहतम् भविष्यति। हि. प. प. निगमेन कर्मकराणां कृते मंगलवारे वेतनं प्रेषितम्। तेषां महर्घता भत्ताः अपि दत्तः अस्ति। पेंशनं च प्रेषयितुम् उक्तं वर्तते। यानप्रवाहस्य विषये वदामः चेत्, बुधवासरे अपि दीपावली- पूर्वस्मिन्नेव दिने हि. प. प. निगमेन विशेषयानानि चण्डीगढं दिल्लीं च प्रेषितानि, बद्दीतः अपि सेवाः अनुष्ठिताः। बद्दी औद्योगिकप्रदेशः अस्ति। अतः तत्र प्रदेशेभ्यः विभिन्नस्थानतः युवानः आगच्छन्ति, ये तत्र रोजगारं कुर्वन्ति। दीपावल्यां गुरुवासरे मध्याह्ने हि. प. प. नि. कर्मकरा अपि गृहं गच्छन्ति, अतः एतेषां यानानां चक्राणि स्थगितानि भविष्यन्ति।

## शिमलावार्ता- 25 दिसम्बरतः

# आरप्स्यते शिमला-शीतकालीन-कार्निवालः



हिमाचलप्रदेशस्य राजधान्याः शिमलायाः ऐतिहासिके रिजस्थले आयोज्यमानः शिशिर-कार्निवालः अस्मिन् समये १० दिवसान् यावत् स्थास्यति। सामान्यजनानाम् पर्यटकानां च प्रियं जातं शिशिरकार्निवलस्य समयस्य विस्तारं कर्तुं निर्णयः कृतः। बुधवासरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यनेन सह महापौरः सुरेन्द्रचौहानः अपि अस्य विषये चर्चां कृतवान्। गतवर्षस्य दिसम्बरमासस्य २५ तः ३१ पर्यन्तं प्रथमः शिमला- शीतकालीन- कार्निवलः देशे सर्वत्र वार्तासु आसीत्। शिमलानगरे शिशिरकार्निवालकाले अपि पर्यटकानाम् आवागमने वृद्धिः अभवत्। नगरस्य व्यापारिणः तत् सफलम् आयोजनम् इति उक्तवन्तः आसन्। अस्य अवधिः सप्तदिनेभ्यः दशदिनानि यावत् वर्धयितुं जनाः आग्रहं कुर्वन्ति। महापौरः मुख्यमन्त्रिणा सह एतस्य विषये चर्चां कृतवान् अस्ति। तस्य अवधिः विस्तारयितुं शक्यते इति मुख्यमन्त्री वदति। अस्मिन् समये अपि अयं कार्निवालः २५ दिसम्बर दिनाङ्कात् आरभ्यते। जनवरीमासस्य ३ दिनाङ्कपर्यन्तं चालयितुं शक्यते। गतवर्षे प्रथमवारं शिमलानगरनिगमेन मनालीपङ्क्तौ शिशिरकार्निवालम् आचरितम् आसीत्। अस्मिन् शिमलानगरस्य मॉलरोडस्थले रिज-ग्राउण्ड इत्यत्र हिमाचली- कलाकाराणाम् अपि सांस्कृतिक-प्रस्तुति- प्रदानस्य अवसरः प्राप्तः। शिशिरकार्निवलस्य समये एव हिमस्केटिङ्ग-क्रीडाङ्गणे बहवः कार्यक्रमाः आयोजयितुं सज्जता भवति।

# ।। श्रीरामायणकथा ।।

## उत्तरकाण्डम्! (एकचत्वारिंशः सर्गः) श्रीरामद्वारा निमिवसिष्ठयोः वृत्तान्तकथनम्। (द्वितीयः खण्डः)



ऋषेः वसिष्ठस्य वचः श्रुत्वा ब्रह्मदेवः तमब्रवीत् हे द्विजसत्तम! त्वं मित्रवरुणजम् आविश। तत्रापि त्वम् अयोनिजः भविता। तत्रापि त्वं महता धर्मेण युक्तः मम वशं पुनरेष्यसि। ब्रह्मदेवेन एवमुक्तः ऋषिः वसिष्ठः तम् अभिवाद्य प्रदक्षिणं च कृत्वा तूर्णं वरुणालयम् अगच्छत्। तस्मिन् काले सुरेश्वरैः पूज्यमानः मित्रोऽपि क्षीरोदेन सहोपेतः वरुणत्वम् अकारयत्। तस्मिन्नेव काले अप्सरा उर्वशी यदृच्छया सखिभिर्वृता तमुद्देशम् आगता। वरुणालये क्रीडन्तीं तां रूपसम्पन्नां दृष्ट्वा अत्यन्तं हृष्टः वरुणः तां पद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम् अप्सरोवरां मैथुनाय अवरयत्।

ततः प्राञ्जलिः सा वरुणम् अब्रवीत् हे सुरेश्वर! पूर्वं हि अहं मित्रेण वृता अस्मि। उर्वश्याः तद् वचनं श्रुत्वा कन्दर्पशरपीडितः वरुणः वाक्यमब्रवीत् हे सुश्रोणि! यदि त्वं सङ्गमं नेच्छसि तर्हि अस्मिन् देवनिर्मिते कुम्भे मम इदं तेजः उत्सृज्य कृतकामः भविष्यामि। लोकनाथस्य वरुणस्य भाषितं श्रुत्वा परमप्रीता अप्सराः उर्वशी अब्रवीत् - कामम् एवमेव भवतु, परन्तु हे देव! मम हृदयं त्वयि स्थितं वर्तते किन्तु मम देहः मित्रस्य अधीने वर्तते। उर्वश्या एवमुक्तः वरुणः तदा ज्वलदग्निसमप्रख्यं महदद्भुतं रेतं तस्मिन् कुम्भे न्यवासृजत्। ततः सा उर्वशी यत्र मित्रदेवः आस्ते तत्र अगच्छत्। ताम् उर्वशीं दृष्ट्वा सङ्क्रुद्धः देवः मित्रः तामब्रवीत् रे दुष्टचारिणि! मया पूर्वं त्वम् अभिमन्त्रिता किन्तु कस्मात्त्वम् अन्यपतिं वृतवती? अनेन दुष्कृतेन त्वं कञ्चित् कालं मनुष्यलोकमास्थाय निवत्स्यसि।

बुधस्य पुत्रः राजर्षिः काशिराजः पुरूरवाः अस्ति। त्वं तत्र गच्छ दुर्बुद्धे! सः तव भर्ता भविष्यति। ततः अप्सराः उर्वशी शापदोषेण बुधस्य आत्मजम् अगच्छत्। तत्र पुरूरवसः पुत्रः श्रीमान् आयुः, आयोः पुत्रः नहुषः यः इन्द्रसमद्युतिः अभवत्। वृत्राय वज्रम् उत्सृज्य देवराजे श्रान्ते तेन नहुषेण शतं वर्षसहस्राणि इन्द्रत्वं प्रशासितम्। एवमेव सा उर्वशी तेन शापेन बहूनि वर्षाणि नरलोके अवसत्। ततः शापक्षयात् पुनः इन्द्रलोकम् अगच्छत्।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# हिमाचलप्रदेशस्य भाषा एवं संस्कृति विभागेन राज्यस्तरीय-पहाड़ी दिवसः आचरितः






हिमसंस्कृतवार्ताः डॉ.पद्मनाभः। ऐतिहासिक-गेयटी-थियेटर-मण्डपस्य एम्फि-थियेटरमध्ये आयोजनं कृतम्। सांस्कृतिक-कार्यक्रमस्य आरम्भः केदी-नेरवा-प्रदेशात् आगतैः शहनाईवादक-नरेश-गन्धर्वेण मंगल-धुनाभिः सम्पन्नः। रीता-सखिभिः सह चंबियाली-लोकगीतस्य प्रस्तुति कृता, नेवल-कला-मंच-नेरवा-चौपालस्य कलाकारैः ठोडा, दीपक, परात्, माला, मुजरा नाटि च उत्कृष्ट रूपेण प्रदर्शिता। वरिष्ठा-लोक-गायिका-शान्तिहेटा तथा राधा-सनाइकया पारंपरिक-लोकगीतानां प्रस्तुत्या जनसमुहः आकर्षितः, प्रेम-बुंदेल-सहकारिभिः च पारंपरिक-झुरी-गायनस्य प्रस्तुतिः महती प्रशंसा प्राप्ता। हरनामसिंहेन सहकारिभिः करयाल-शैलीमध्ये वृद्ध-वृद्धायाः स्वाङ्गस्य प्रदर्शनं कृत्वा जनान् हासयन् हर्षं प्रदत्तम्। पूजा-कला-मंचस्य कलाकारैः शिमलायाः ग्रामीण-क्षेत्रस्य नाटि-प्रस्तुतिः कृता। चेतन-सहकारिभिः अपि करयाल-शैलीमध्ये गोरखस्य स्वाङ्गेन जनान् हसयित्वा आनंदं दत्तम्। शगीन-तारादेवीस्थ पूजा-कला-मंचस्य कलाकारैः पारंपरिक-परिधानं धृत्वा लोक-नृत्यस्य आकर्षकं प्रदर्शनं कृतम्। अस्यां संध्याम् विभागस्य उपनिदेशिका भाषा कुसुम संघाईक, शिमलायाः जिला भाषा अधिकारी अनिल हारटा, शिवम ठाकुर, देवेंद्र कुमार देव च उपस्थिताः आसन्।

प्रतिदिन पाऐं संस्कृत समाचार पत्र पीडीएफ , मात्र 100 रुपये
वार्षिकी सदस्यता
हिमसंस्कृतवार्ताः
Send screen shot of payment to 7876636263
Scan & Pay 7876636263
इदं संस्कृताय न मम